॥ श्रीजिनाय नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्री विश्वसेन चरित्रं ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय तथा भाषांतर करनार तथा छपावी प्रसिद्ध करनार--पंडित श्रावक हीरालाल हंसराज

(अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्व हक स्वाधीन राख्या छे.)

संवत १९८४ सने १९२८ वीर संवत् २४५४

किंमत रु. १-४-०

॥ जिनाय नमः ॥

॥ श्रीचारित्रविजय गुरुभ्यो नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ अथ श्री विश्वसेनचरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय तथा भाषांतर करनार–पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

श्रीहस्तिपुरमित्यस्ति भुवस्तिलकवत्पुरम् । सेव्यन्ते कृतकीर्त्यम्बुमज्जनैर्यज्जनैः श्रियः ॥ १ ॥

अन्वयः–भुवः तिलकवत् श्रीहस्तिपुरं इति पुरं अस्ति, कृत कीर्ति अंबु मज्जनैः यज्जनैः श्रियः सेव्यंते. ॥ १ ॥

अर्थः–पृथ्वीना तिलकसरखुं श्रीहस्तिपुर नामनुं नगर छे. करेल छे कीर्तिरूपी जलमां स्नान जेओए एवा ते नगरीना लोको लक्ष्मीदेवीनी पूजा करे छे. ( अर्थात् घणु लक्ष्मीदान आपी कीर्ति मेळवे छे ) ॥ १ ॥

तत्रासीदहितत्रासी सुमित्र इति भूपतिः । यत्प्रतापप्रतानिन्या निन्ये भानुः प्रसूनताम् ॥ २ ॥

अन्वयः–तत्र अहितत्रासी सुमित्रः इति भूपतिः आसीत्, यत् प्रताप प्रतानिन्या भानुः प्रसूनतां निन्ये. ॥ २ ॥

अर्थः–ते नगरमां शत्रुओने त्रास आपनारो " सुमित्र " एवा नामनो राजा हतो, के जे राजाना प्रतापरूपी वेलडीए सूर्यने तो ( पोताना ) पुष्परूप बनाव्यो हतो ॥ २ ॥

तस्य सूनुरभूद्विश्वसेनाख्यो विश्वभूषणम् । यः कलानां गुणानां च शङ्के सङ्केतकेतनम् ॥ ३ ॥

अन्वयः—तस्य विश्व विभूषणं विश्वसेन आख्यः सूनुः अभूत्, यः कलानां गुणानां च संकेतकेतनं शंके. ॥ ३ ॥

अर्थः—ते राजानो जगतना अलंकार सरखो विश्वसेन नामे पुत्र हतो, के जे कलाओ तथा गुणोने ( एकठा मळवाना ) संकेत स्थान सरखो हतो, एवुं हुं अनुमान करुं छुं. ॥ ३ ॥

अदुष्टयैव दृष्ट्या स स्वभावाविर्भवत्कृपः । ददर्श सर्पतः सर्पानपि दर्पातिपातिनः ॥ ४ ॥

अन्वयः–स्वभाव आविर्भवत्कृपः सः दर्पातिपातिनः सर्पतः सर्पान् अपि अदुष्टया एव दृष्ट्या ददर्श ॥ ४ ॥

अर्थः—स्वभावथीज प्रगट थती छे, दया जेने, एवो ते राजकुमार गर्विष्ट थइ दोड्या आवता सर्पोने पण दयायुक्त दृष्टिथीज जोतो हतो. ॥ ४ ॥

कदाप्यन्यायवल्लीनां मस्करेऽपि न तस्करे । करुणाकरिणीविन्ध्यो वधबुद्धिं व्यधत्त सः ॥ ५ ॥

अन्वयः—करुणा करिणी विंध्यः सः अन्यायवल्लीनां मस्करे अपि तस्करे कदापि वधबुद्धिं न व्यधत्त. ॥ ५ ॥

अर्थः—दयारूपी हाथणीने (वसवामाटे) विंध्याचलसरखो ते राजकुमार अन्यायरूपी वेलडीओने ( चडवाना ) वांससरखा एवा पण चोरना संबंधमां कदापि पण (तेने) मारी नाखवानी बुद्धि करतो नही. ॥ ५ ॥

अपराधपराधीने क्रोधासीनेऽपि विद्विषि । न कदाचिदसौ चक्रे मत्सरं विश्ववत्सलः ॥ ६ ॥

अन्वयः—अपराध पराधीने, क्रोधासीने अपि विद्विषि विश्ववत्सलः असौ कदाचित् मत्सरं न चक्रे. ॥ ६ ॥

अर्थः—अपराधोथी पराधीन थयेला, तथा पाछा क्रोधातुर थयेला एवा शत्रुप्रते पण जगत्‌पर प्रेम राखनारो ते राजकुमार कोइ-पण समये द्वेष करतो नही. ॥ ६ ॥

चत्वारोऽस्य कलासारसूरवीरजयाख्यया । मन्त्रिक्षत्रवणिग्वैद्यनन्दनाः सुहृदोऽभवन् ॥ ७ ॥

अन्वयः—अस्य मंत्रि क्षत्र वणिक् वैद्यनंदनाः, कलासार सूर वीर जय आख्यया चत्वारः सुहृदः अभवन्. ॥ ७ ॥

अर्थः—आ राजकुमारना मंत्रि, क्षत्रिय, वणिक् तथा वैद्यना (अनुक्रमे) कलासार, सूर, वीर अने जयनामना चार मित्रो हता.

एभिः समं स मन्त्रीन्द्रपुत्राद्यैर्माद्यदुद्यमः । चतुर्भिः शुशुभे खेलन्धर्मैरात्मेव धीमतः ॥ ८ ॥

अन्वयः—धीमतः आत्म धर्मैः इव, मंत्रींद्रपुत्राद्यैः एभिः चतुर्भिः समं खेलन् माद्यत् उद्यमः सः शुशुभे. ॥ ८ ॥

अर्थः—बुद्धिवानने आत्मा जेम (दानआदिक चारप्रकारना) धर्मोवडे शोभे, तेम मंत्रिना पुत्रआदिक ते चार मित्रोनीसाथे क्रीडा करतो तथा विशाल उद्यमवाळो ते राजपुत्र शोभतो हतो. ॥ ८ ॥

स प्रैक्षत कृपाशीलो लीलोद्यानेऽन्यदा व्रजन् । चण्डालैश्चालितं कंचिच्छूलमूलचरं नरम् ॥ ९ ॥

अन्वयः—सः कृपाशीलः अन्यदा लीला उद्याने व्रजन् चंडालैः चालितं शूलमूलचरं कंचित् नरं प्रैक्षत ॥ ९ ॥

अर्थः—ते दयाळु राजकुमारे एक दिवसे क्रीडा करवाना बगीचामां जतांथकां, चांडालोवडे लेइ जवाता, (अने ए रीते) शूली-तरफ चालता एवा कोइक पुरुषने जोयो. ॥ ९ ॥

दशामीदृशमागच्छत्किमागः कलयन्नयम् । इति भूपभुवा पृष्टश्चण्डालपतिरालपत् ॥ १० ॥

अन्वयः--अयं किं आगः कलयन् ईदृशं दशां आगच्छत्? इति भूपभुवा पृष्टः चंडालपतिः आलपत्. ॥ १० ॥

अर्थः--आ पुरुष शुं अपराध करवाथी आवी दशाए पहोंच्यो छे? एम ते राजकुमारे पूछवाथी मुख्य चांडाले कह्युं के, ॥१०॥

नभोरत्नसपत्नाभरत्नाभरणपेटिका । त्वन्मातुरमुनाहारि राज्ञासौ समहारि तत् ॥ ११ ॥

अन्वयः-त्वन्मातुः नभो रत्न सपत्न आभ रत्न आभरण पेटिका अमुना अहारि, तत् राज्ञा असौ समहारि. ॥ ११ ॥

अर्थः–तमारी मातानी सूर्यसरखी कांतिवाळां रत्नोना आभूषणोनी पेटी आ पुरुषे चोरी छे, अने तेथी राजाए आने मारी नाखवानो (हुकम कर्यो छे.) ॥ ११ ॥

मन्मातुर्वित्तहर्तायं हन्तव्यः स्वेच्छया मया । इत्युदित्वाथ तेभ्यस्तं कुमारश्चौरमग्रहीत् ॥ १२ ॥

अन्वयः–अथ मन्मातुः वित्तहर्ता अयं मया स्वेच्छया हंतव्यः, इति उदित्वा कुमारः तेभ्यः तं चौरं अग्रहीत्. ॥ १२ ॥

अर्थः–हवे मारी मातानुं धन हरनार आ चोरने मारे मारी इच्छामुजब मारवो जोइये, एम कही ते राजकुमारे तेओनी पासेथी ते चोरने (पोते स्वाधीन कर्यो. ॥ १२ ॥

अन्यायाद् गृह्यमाणा श्रीर्मणिः फणिपतेरिव । मर्त्येषु मोहमत्तेषु दत्ते मृत्युमसंशयम् ॥१३ ॥

आकृष्टिमन्त्रे लक्ष्मीणां पिष्टियन्त्रे महापदाम् । धर्मस्य जीवितप्राये मतिर्न्याये वितन्यताम् ॥ १४ ॥

इत्युक्त्वा शिक्षयित्वायं कुमारेण मलिम्लुचः । वरचीवरदानेन तोषितः प्रेषितः ययौ ॥ १५ ॥

अन्वयः—फणिपतेः मणिः इव अन्यायात् गृह्यमाणा श्रीः मोहमत्तेषु मर्त्येषु असंशयं मृत्युं दत्ते, ॥ १३ ॥ लक्ष्मीणां आकृष्टिमंत्रे, महापदां पिष्टियंत्रे, धर्मस्य जीवितप्राये न्याये मतिः वितन्यतां ? ॥ १४ ॥ इति उक्त्वा शिक्षयित्वा, वरचीवरदानेन तोषितः कुमारेण प्रेषितः अयं मलिम्लुचः ययौ. ॥ १५ ॥ त्रिभिर्विशेषकं ॥

अर्थः—सर्पना मणिनीपेठे अन्यायथी चोरेली लक्ष्मी मोहांध माणसोने खरेखर मृत्यु आपे छे, ॥१३॥ (माटे) लक्ष्मीने खेंची लाववाना मंत्रसरखा, अने महान् विपत्तिने पीसीनाखवाने घंटीखरखा, अने धर्मना जीवितसरखा एवा न्यायमां बुद्धि राखवी. ॥ १४ ॥ एम कही शिखामण आपीने, तथा उत्तम वस्त्रना दानथी तेने खुशी करी ते राजकुमारे छोडीमूकेलो ते चोर (त्यांथी) चाल्यो गयो. ॥ १५ ॥ त्रिभिर्विशेषकं. ॥

एकदा राजसेवार्थं व्रजन्राजगृहाजिरे । प्रभूतां मण्डलीभूतां भूपजः प्रैक्षत प्रजाम् ॥ १६ ॥

अन्वयः—एकदा भूपजः राजसेवार्थं व्रजन् राज गृह आजिरे मंडलीभूतां प्रभूतां प्रजां प्रैक्षत. ॥ १६ ॥

अर्थः—(वळी) एक दिवसे ते राजकुमारे राजानी सेवामाटे जतांथकां राजमेहेलना आंगणामां प्रजाना घणा लोकोने एकठा थयेला जोया. ॥ १६ ॥

किमत्रेति कुमारेण पृष्टः कोटीरयन्करौ । व्यक्तभक्तिकलादक्षस्तलारक्षो जगाद गाः ॥ १७ ॥

अन्वयः-अत्र किं ? इति कुमारेण पृष्टः व्यक्त भक्ति कला दक्षः तलारक्षः करौ कोटीरयन् गाः जगाद. ॥ १७ ॥

अर्थः-अहीं शुं छे ? एम ते राजकुमारे पूछवाथी (पोतानी) भक्तिकला प्रगट देखाडवामां चतुर एवो कोटवाल ( पोताना ) बन्ने हाथोने मुकुटरूप करतो थको वाणी बोलवा लाग्यो के, ॥ १७ ॥

निजा निजघ्निरे येन विषयाश्छद्मसद्मना । त्वरावत्पत्रसेनेन श्येनेनेव पतत्रिणः ॥ १८ ॥

प्रच्छन्नपुंनियुक्तेन रसदानेन यः सदा । हन्ति नो दन्तिनो लीलाशैलानिव जयश्रियः ॥ १९ ॥
जगत्यस्ति समस्तेऽपि नास्माकं यत्परः परः । सैषः विक्रमसेनाख्यस्ताम्रलिप्तीपुरीश्वरः ॥ २० ॥
वीरसेनेन सेनान्या छलधाटिकया धृतः । क्षेपितः क्ष्माभुजा हन्तुमिह मन्तुमहोदधिः ॥ २१ ॥

अन्वयः-श्येनेन पतत्रिणः इव त्वरावत्पत्रसेनेन, छद्मसद्मना येन निजाः विषयाः निजघ्निरे, ॥ १८ ॥ प्रच्छन्न पुंनियुक्तेन रसदानेन यः सदा जयश्रियः लीलाशैलान् इव नः दंतिनः हंति, ॥ १९ ॥ समस्ते अपि जगति अस्माकं यत्परः परः न अस्ति, सः एषः विक्रमसेन आख्यः ताम्रलिप्तीपुरी ईश्वरः, ॥ २० ॥ वीरसेनेन सेनान्या छलधाटिकया धृतः, मंतुमहोदधिः क्ष्माभुजा इह हंतुं क्षेपितः ॥ २१ ॥ चतुर्भिः कलापकं ॥

अर्थः-बाज जेम पक्षिओने मारे, तेम झडपथी तीर फेंकनारी सेनावाळा (पक्षे-झडपवाळी पांखरूपी सैन्यवाळा) कपटना स्थानसरखा, एवा जेणे आपणा देशो भांग्या छे, ॥ १८ ॥ ( तथा ) गुप्त पुरुषोमारफत झेर आपीने जे हमेशां जयलक्ष्मीने क्रीडा करवाना पर्वतसरखा आपणा हाथीओने मारी नाखे छे, ॥ १९ ॥ (तथा) समस्त जगतमां जेनासरखो बीजो कोइ आपणो शत्रु नथी, ते आ विक्रमसेन नामनो ताम्रलिप्तीनगरीनो राजा छे, ॥ २० ॥ (अने तेने आपणा) वीरसेननामना सेनापतिए कपटथी छापो मारी पकड्यो छे, एवा अपराधना महासागरसरखा (आ राजाने आपणा) राजाए अहीं मारीनाखवामाटे आण्यो छे. ॥ २१ ॥

इति श्रुतिकृतक्रोध इवाकृष्टं प्रनर्तयन् । कृपाणं भृकुटीभीमभालः कालकटाक्षवत् ॥ २२ ॥
मन्तुमन्तममुं हन्ता हन्तायं भूपभूः स्वयम् । इति कौतूहलोत्तालालोके लोके स्थितेऽभितः ॥ २३ ॥
मृत्युर्ममायमायातीत्युद्वृताकुलचक्षुषः । ताम्रलिप्तीपूरीभर्तुरुपर्यागत्य वेगतः ॥ २४ ॥
कृपाश्रुपूर्णदृक्प्रीत्या वपुः सपुलकं वहन् । असौ जगदसंबन्धबन्धुर्बन्धनमच्छिनत् ॥ २५ ॥

अन्वयः—इति श्रुति कृत क्रोधः इव आकृष्टं कृपाणं प्रनर्तयन्, कालकटाक्षवत् भृकुटी भीम भालः, ॥ २२ ॥ हंत अमुं मंतुमंतं अयं भूपभूः स्वयं हंता ! इति कौतूहल उत्ताल आलोके लोके अभितः स्थिते, ॥२३॥ मम अयं मृत्युः आयाति, इति उद्वृत आकुल चक्षुषः, ताम्रलिप्तीपुरी भर्तुः उपरि वेगतः आगत्य, ॥ २४ ॥ कृपा अश्रु पूर्ण दृक्, प्रीत्या सपुलकं वपुः वहन्, जगत् असंबंध बंधुः असौ बंधनं अच्छिनत्. ॥ २५ ॥ चतुर्भिः कलापकं ॥

अर्थः—एम सांभळीने जाणे क्रोधातुर थयो होय नही ! तेम (म्यानमांथी) खेंची कडाडेली तलवारने नचावतो, तथा यमदेवना कटाक्षोनीपेठे भृकुटीथी भयंकर ललाटवाळो, ॥ २२ ॥ अरे ! आ अपराधीने आ राजकुमार (शु) पोतेज मारशे ! एम आश्चर्यथी ताडीओ देइ जोता लोको चोतरफ उभे छते ॥ २३ ॥ मारुं आ (प्रत्यक्ष) मृत्युज आवे छे, एवा विचारथी फाटीने व्याकुल थयेली छे आंखो जेनी, एवा ते ताम्रलीप्ती नगरीना राजापासे वेगथी धसी आवीने, ॥२४॥ दयाथी आंसुसहित आंखो-

वाळा, अने प्रेमथी रोमांचित शरीरने धारण करता, तथा संबंधविना पण जगतना बांधवसरखा ते राजकुमारे (ते राजानुं) बंधन कापी नाख्युं. ॥ २५ ॥ चतुर्भिः कलापकं ॥

**त्वरया ये मनांसीव मनसामपि रेजिरे । तैरश्वैर्विश्वसेनेन प्रेषितः स ययौ जवात् ॥ २६ ॥**

अन्वयः--मनसां अपि मनांसि इव ये त्वरया रेजिरे, तैः अश्वैः विश्वसेनेन प्रेषितः सः जवात् ययौ. ॥ २६ ॥

अर्थः–मननां पण जाणे मन होय नही ! एम वेगवडे करीने जे शोभता हता, तेवा घोडाओ साथे ते विश्वसेन कुमारे मोकलेलो ते विक्रमसेनराजा (त्यांथी) झडपबंध चाल्यो गयो. ॥ २६ ॥

**तत्परिज्ञाय विच्छायः कुपितो नृपतिर्जगौ । कुमारं प्रति सारङ्गपतिवन्निष्ठुरस्वरः ॥ २७ ॥**

अन्वयः–तत् परिज्ञाय कुपितः विच्छायः नृपतिः सारंगपतिवत् निष्ठुरस्वरः कुमारंप्रति जगौ. ॥ २७ ॥

अर्थः–ते वृत्तांत जाणीने क्रोध पामेलो तथा विलखो पडेलो राजा, सिंहनीपेठे त्राड मारीने कुमारने कहेवा लाग्यो के, ॥२७॥

**येनैकेन हतेन स्याद्बहूनां देहिनां सुखम् । स वध्यः शुद्धबुद्धीनां कृपातिशयलिप्सया ॥ २८ ॥**

अन्वयः—येन एकेन हतेन बहूनां देहिनां सुखं स्यात्, सः कृपातिशय लिप्सया शुद्धबुद्धीनां वध्यः ॥ २८ ॥

अर्थः–जेने एकने मारवाथी घणा प्राणीओने सुख थाय. ते वधारे दया करवानी इच्छाथी शुद्धबुद्धिवाळाने मारवा लायक छे.

कृपा ते कूपपातेन किमियं न क्षयं गता। यद्द्विषं मुञ्चता देशः पातकिन् घातितस्त्वया ॥ २९ ॥

अन्वयः—(रे) पातकिन्! द्विषं मुंचता त्वया यत् देशः घातितः, इयं ते कृपा कूपपातेन क्षयं किं न गता? ॥ २९ ॥

अर्थः—(अरे) पापी! शत्रुने छोडी मूकीने तें जे देशनो धात कर्यो, एवी आ तारी दया कूवामां पडीने विनाश केम न पामी?

कुर्वन्भूरि स्वदेशघ्ने निर्विवेक कृपां रिपौ। त्वमप्यसि विपक्षो मे न स्थेयं मद्भुवि त्वया ॥ ३० ॥

अन्वयः—(हे) निर्विवेक! स्वदेशघ्ने रिपौ भूरि कृपां कुर्वन् त्वं अपि मे विपक्षः असि, मद्भुवि त्वया न स्थेयं. ॥ ३० ॥

अर्थः—(हे) निर्विवेकी! पोताना देशनो विनाश करनारा शत्रु उपर (पण) घणी दया करनारो तुं पण मारो शत्रु छे, (माटे) मारी राज्यभूमिमां तारे न रहेवुं. ॥ ३० ॥

इति व्याहृतिमाकर्ण्य कुमारस्तारसंमदः। स्फारविद्वच्चमत्काररचनं वचनं दधौ ॥ ॥ ३१ ॥

अन्वयः—इति व्याहृतिं आकर्ण्य तारसंमदः कुमारः स्फार विद्वत् चमत्कार रचनं बचनं दधौ. ॥ ३१ ॥

अर्थः-एवुं वचन सांभळीने वधारे खुशी थयेलो ते कुमार म्होटा विद्वानोने पण आश्चर्य करनारुं वचन बोल्यो के, ॥ ३१ ॥

श्वसंल्लसन्ग्रसन्को न जन्तून् हन्ति सहस्रशः। तदेकस्य वधः कस्य प्राज्यप्राणिप्रियाय न ॥ ३२ ॥

अन्वयः-कः श्वसन् लसन् ग्रसन् सहस्रशः जंतून् न हंति? तत् कस्य एकस्य वधः प्राज्य प्राणि प्रियाय न? ॥ ३२ ॥

अर्थः–कयो प्राणी श्वास लेतां, विलास करतां, तथा खातांथकां हजारोगमे प्राणीओने मारतो नथी ? माटे तेमाना कया एक प्राणीनो वध घणा प्राणीओने हितकारी (बचावनारो) नथी थतो ? ॥ ३२ ॥

एवं सति मतिप्रष्ठैर्बहूनां हृष्टिहेतवे । को हन्तव्यः क कर्तव्यः कृपावद्भिः कृपाकणः ॥ ३३ ॥

अन्वयः–एवं सति मतिप्रष्ठैः कृपावद्भिः बहूनां हृष्टिहेतवे कः हंतव्यः ? क्व कृपाकणः कर्तव्यः ? ॥ ३३ ॥

अर्थः–एम होते छते बुद्धिवान दयाळु माणसोए घणा प्राणीओने खुशी करवामाटे कोने मारवो ? अने क्यां दयानो लेश करवो ?

तन्मन्ये सर्वथा नाथ दुरवस्थागतेऽङ्गिनि । मित्रामित्राविचारेण प्राणित्राणं विधीयते ॥ ३४ ॥

अन्वयः–तत् (हे) नाथ ! मन्ये, सर्वथा अंगिनि दुरवस्थागते मित्र अमित्र अविचारेण प्राणित्राणं विधीयते. ॥ ३४ ॥

अर्थः–माटे हे स्वामी ! हुं तो एम मानुं छुं के, ज्यारे सर्वथा प्रकारे प्राणी दुःखी अवस्थाने प्राप्त थयो होय, त्यारे मित्र अथवा शत्रुनो विचार कर्याविनाज (ते) प्राणीनुं रक्षण करवुं. ॥ ३४ ॥

सहन्त एव ये हन्त शत्रुं तेऽपि शिवाध्वगाः । ये तु तत्रोपकुर्वन्ति तेषां गतिमवैति कः ॥ ३५ ॥

अन्वयः–हंत ! ये शत्रुं सहंते एव, ते अपि शिव अध्वगाः, तु ये तत्र उपकुर्वंति, तेषां गतिं कः अवैति ? ॥ ३५ ॥

अर्थः–अरे ! जेओ शत्रु (तरफनां दुःखने) फक्त सहनज करे छे, तेओ पण मोक्षगामी थाय छे, तो पछी जेओ ते शत्रुउपर उप-

कार करे छे, तेओनी गति कोण जाणी शके छे? ॥ ३५ ॥

तद् द्विषं मुञ्चतस्तात क्व मेऽभूदविवेकिता । क्व वास्मि द्वेषिपक्षोऽहं त्वत्पादाम्बुजषट्पदः ॥ ३६ ॥

अन्वयः—तत् (हे) तात! द्विषं मुंचतः मे अविवेकिता क्व अभूत्? वा क्व अहं द्वेषिपक्षः असि? त्वत्पादांबुज षट्पदः ।३६।

अर्थः—माटे हे पिताजी! शत्रुने छोडी देतां मारुं अविवेकीपणुं क्यां थयुं.? अथवा क्यां हुं शत्रुनो पक्षकारी छुं? (केमके) हुं तो आपना चरणकमलोने भमरानीपेठे (सेवुं छुं.) ॥ ३६ ॥

यदादिष्टं च देवेन मन्मही मुच्यतामिति । तद्गतोऽयमहं पापं पितुराज्ञाभिदं विदुः ॥ ३७ ॥

अन्वयः—च देवेन यत् इति आदिष्टं, मन्मही मुच्यतां, तत् अयं अहं गतः, पितुः आज्ञाभिदं पापं विदुः. ॥ ३७ ॥

अर्थः—वळी आपे जे एम कह्युं के, मारी भूमि छोडी दे, तो आ हुं चाल्यो, केमके पितानी आज्ञानो भंग करनार ( पुत्रने ) पापी कहेलो छे. ॥ ३७ ॥

इत्युदीर्य महावीर्यः प्रस्थितो दूरदेशधीः । प्रावृषीवाम्बुजाद्धंसः पुंवतंसः स संसदः ॥ ३८ ॥

अन्वयः—इति उदीर्य महावीर्यः, दूरदेशधीः, सः पुंवतंसः प्रावृषि अंबुजात् हंसः इव संसदः प्रस्थितः. ॥ ३८ ॥

अर्थः-एम कहीने महापराक्रमी, तथा दूर परदेशमां (जवानी छे) बुद्धि जेनी एवो ते महान् पुरुष, वर्षाकाळमां कमळमांथी जेम

हंस, तेम राजसभामांथी चालतो थयो. ॥ ३८ ॥

कृपायाः परमप्राणः परत्राणाय शुद्धधीः । योऽस्माकं हृदयाधारः स कुमारः क्व गच्छति ॥ ३९ ॥

पराभूतान्परैः पाति यो मातेव पितेव नः । जगतां जीविताधारः स कुमारः क्व गच्छति ॥४०॥

जगन्त्यपि विजानाति यः स्वस्येव कुटुम्बकम् । पवित्रचरितोदारः स कुमारः क्व गच्छति ॥ ४१ ॥

शरीरं जीवितेनेव येनैकेन चकास्ति पूः । कृताखिलपरीहारः स कुमारः क्व गच्छति ॥ ४२ ॥

इत्याक्रन्दपरैर्मन्ददृग्भिरुत्खातचेतनैः । पौरैः प्रेक्षितसंचारः कुमारो निर्ययौ पुरात् ॥ ४३ ॥

अन्वयः—कृपायाः परम प्राणः, पर त्राणाय शुद्धधीः, यः अस्माकं हृदय आधारः, सः कुमारः क्व गच्छति ? ॥ ३९ ॥ परैः पराभूतान् नः यः माता इव पिता इव पाति, जगतां जीवित आधारः सः कुमारः क्व गच्छति ? ॥ ४० ॥ जगंति अपि यः स्वस्य कुटुंबकं इव विजानाति, पवित्र चरित उदारः सः कुमारः क्व गच्छति ? ॥ ४१ ॥ जीवितेन इव शरीरं, येन एकेन पूः चकास्ति, कृत अखिल परीहारः सः कुमारः क्व गच्छति ? ॥ ४२ ॥ इति आक्रंद परैः, मंद दृग्भिः, उत्खात चेतनैः पौरैः प्रेक्षित संचारः कुमारः पुरात् निर्ययौ. ॥ ४३ ॥ पंचभिः कुलकं ॥

अर्थः—दयाना परम प्राणसरखो, तथा परनुं रक्षण करवामां शुद्ध बुद्धिवाळो, अने जे अमारां मननो आधाररूप छे, एवो आ

कुमार क्यां जाय छे ? ॥ ३९ ॥ बीजाओथी पराभव पामेला एवा अमोने जे मातापितानीपेठे पाळे छे, तथा जे जगतना जीवनने आधारभूत छे, एवो आ कुमार क्यां जाय छे? ॥ ४० ॥ (वळी) जगतने पण जे पोताना कुटुंबसमान लेखे छे, तथा जेनुं आचरण पवित्र अने उदार छे, एवो आ कुमार क्यां जाय छे ? ॥ ४१ ॥ (वळी) जीवथी जेम शरीर शोभे, तेम जे एकवडे (आ) नगर शोभी रह्युं छे, एवो आ कुमार सर्व कंइ तजीने क्यां जाय छे ? ॥ ४२ ॥ एवीरीते विलाप करता, निस्तेज आंखोवाळा, तथा बेहोश थयेला नगरना लोको जेनुं परदेशगमन जोइ रहेला छे, एवो ते विश्वसेनकुमार नगरमांथी (नीकळी) चालतो थयो.

निर्याते जीवितप्राये वीरेऽस्मिन्गुणवेश्मनि । नगर्या नागराश्चक्रुरपस्नानमिवाश्रुभिः ॥ ४४ ॥

अन्वयः—जीवितप्राये, गुणवेश्मनि अस्मिन् वीरे नगर्याः निर्याते नागराः अश्रुभिः अपस्नानं इव चक्रुः. ॥ ४४ ॥

अर्थः—जीव सरखो, तथा गुणोना स्थान सरखो, एवो आ महाशूरवीर कुमार नगरनी बहार निकळी जवाथी नागरिकोए आंसुओवडे जाणे सूतक स्नान कर्युं. ॥ ४४ ॥

पौरेऽनुगन्तुकामेऽपि स्थिते क्षितिपतेर्भयात् । सुहृदस्ते महासत्त्वाश्चत्वारोऽपि तमन्वगुः ॥ ४५ ॥

अन्वयः—अनुगंतुकामे अपि क्षितिपतेः भयात् पौरे स्थिते, महासत्त्वाः ते चत्वारः अपि सुहृदः तं अन्वगुः. ॥ ४५ ॥

अर्थः—पाछळ जवानी इच्छा होवा छतां पण राजाना भयथी नागरिको त्यांज रहेते छते, महापराक्रमी एवा ते चारे मित्रो तेनी पाछळ साथेज गया. ॥ ४५ ॥

शुशुभे स स भूदेशो यं यं सोऽर्क इवागमत् । यं यं मुमोच स श्रीमान्स स निःश्रीकतां गतः ॥ ४६ ॥

अन्वयः—अर्कः इव सः यं यं अगमत्, सः सः भूदेशः शुशुभे, यं यं सः श्रीमान् मुमोच, सः सः निःश्रीकतां गतः. ।४६।

अर्थः—सूर्यनीपेठे ते विश्वसेन कुमार जे जे देशमां गयो, ते ते पृथ्वीप्रदेश शोभवा लाग्यो, तथा जे जे देशने ते तेजस्वी कुमार छोडतो गयो, ते ते देश निस्तेज थयो. ॥ ४६ ॥

विलङ्घ्य पञ्चभिः कंचिद्वनदेशं दिनैरसौ । क्वचिद्ग्रामे गतस्तस्थौ सरस्तीरे तरोस्तले ॥ ४७ ॥

अन्वयः—असौ पंचभिः दिनैः कंचित् वनदेशं विलंघ्य क्वचित् ग्रामे गतः सरस्तीरे तरोः तले तस्थौ. ॥ ४७ ॥

अर्थः—(ए रीते) आ राजकुमार पांच दिवसे केटलोक वनप्रदेश ओळंगीने कोइक गामपासे पहोंच्यो, (अने त्यां) तळावने किनारे वृक्षतले बेठो. ॥ ४७ ॥

तत्र क्षत्रवणिक्पुत्रौ शूरवीरौ वरत्वरौ । ग्रामगर्भात्किमप्यन्नं समादाय समागतौ ॥ ४८ ॥

अन्वयः—तत्र वरत्वरौ क्षत्रवणिक्पुत्रौ शूरवीरौ ग्रामगर्भात् किं अपि अन्नं समादाय समागतौ. ॥ ४८ ॥

अर्थः—त्यां उतावळी चालवाळा क्षत्री तथा वणिकना शूर अने वीरनामना पुत्रो गामनी अंदरथी कंइक अनाज लेइ आव्या.

तौ तु मन्त्रिभिषक्पुत्रौ कलासारजयौ रयात् । कारयांचक्रतुर्विश्वसेनं देवार्चनक्रियाम् ॥ ४९ ॥

अन्वयः—तु तौ कलासार जयौ मंत्रि भिषक् पुत्रौ रयात् विश्वसेनं देवअर्चनक्रियां कारयां चक्रतुः. ॥ ४९ ॥

अर्थः—वळी ते कलासार तथा जयनामना मंत्रि तथा वैद्यना पुत्रोए तुरत ते विश्वसेनकुमारने देवपूजननी क्रिया करावी. ।४९।

**अथ सोऽतिथये पश्यन्दिशो मासोपवासिनम् । मुनिमैक्षिष्ट धन्यानां फलन्त्याशु मनोरथाः ॥ ५० ॥**

अन्वयः—अथ सः अतिथये दिशः पश्यन् मासोपवासिनं मुनिं ऐक्षिष्ट, धन्यानां मनोरथाः आशु फलंति. ॥ ५० ॥

अर्थः—पछी ते विश्वसेनकुमारे (कोइ) अतिथिनी (शोधमाटे) दिशाओतरफ जोतांथकां एकमासना उपवासी एवा (कोइक) मुनिराजने जोया. भाग्यवानोना मनोरथो तुरत फळे छे. ॥ ५० ॥

**ततः स्वच्छन्दचतुरः पप्रच्छ चतुरः सखीन् । कुमारः पारणाहेतोरन्नं दातुमना मुनौ ॥ ५१ ॥**

अन्वयः—ततः स्वच्छंदचतुरः कुमारः पारणाहेतोः मुनौ अन्नं दातुमनाः चतुरः सखीन् पप्रच्छ. ॥ ५१ ॥

अर्थः—पछी स्वभावथीज चतुर एवा ते विश्वसेनकुमारे पारणामाटे ( ते ) मुनिराजने आहार आपवानी इच्छाथी (पोताना) ते चारे मित्रोने पूछयुं. ॥ ५१ ॥

**क्षुधान्धैः सखिदाक्षिण्यमायाभावनया ततः । उक्तं वणिग्भिषग्मन्त्रिनन्दनैर्दीयतामिति ॥ ५२ ॥**

अन्वयः—ततः क्षुधांधैः वणिक् भिषक्, मंत्रिनंदनैः सखि दाक्षिण्य मायाभावनया दीयतां इति उक्तं. ॥ ५२ ॥

अर्थः—त्यारे क्षुधातुर एवा (ते) वणिक्, वैद्य तथा मंत्रीना पुत्रोए मित्रनी दाक्षिणताथी तथा कपटयुक्त भावनाथी "भले आपो"

एम कह्युं. ॥ ५२ ॥

शूरस्तूत्साहवान्प्राह मन्ये धन्येतरैर्नरैः । पात्रमत्र क्षणे नेदृग्दृश्यं द्राग्दीयतामिति ॥ ५३ ॥

अन्वयः—शूरः तु उत्साहवान् प्राह, मन्ये, अत्र क्षणे धन्य इतरैः नरैः ईदृग् पात्रं न दृश्यं, इति द्राग् दीयतां ! ॥ ५३ ॥

अर्थः—परंतु शूरे तो आनंदित थइ कह्युं के, (हुं तो) एम मानुं छुं के, आवे वखते निर्भागी पुरुषोने ( तो ) आवुं सुपात्र मळे नही, माटे तमो तुरत आपो ! ॥ ५३ ॥

अथाभ्युत्थाय भूनाथसूनुनाभ्यर्थितो मुनिः । दक्षो निर्दूषणं जानन्नन्नमादातुमुद्यतः ॥ ५४ ॥

अन्वयः—अथ अभ्युत्थाय भूनाथसूनुना अभ्यर्थितः दक्षः मुनिः अन्नं निर्दूषणं जानन् आदातुं उद्यतः. ॥ ५४ ॥

अर्थः—पछी उठीने ते राजकुमारे विनंति करवाथी (ते) चतुर मुनि आहारने दोषरहित जाणी लेवाने तैयार थया. ॥ ५४ ॥

आनन्दार्णवकल्लोलशीकरायितदृक्पथाः । कुमारेशः समारेभे तस्मै दातुमनातुरः ॥ ५५ ॥

अन्वयः—आनंद अर्णव कल्लोल शीकरायित दृक्पथाः, अनातुरः कुमारेशः तस्मै दातुं समारेभे. ॥ ५५ ॥

अर्थः—आनंदरूपी समुद्रना मोजांओथी अश्रुबिंदुयुक्त थयेल छे दृष्टिमार्ग जेनो, तथा उदार मनवाळो ते कुमारेन्द्र ( पण मुनिने आहार ) देवा लाग्यो. ॥ ५५ ॥

दत्ते भोज्यार्धमात्रेऽथ सूरः साकूतमभ्यधात् । कुमार त्वं कृपाधारः क्षुधातापिषु नापरः ॥ ५६ ॥

अन्वयः-अथ भोज्य अर्धमात्रे दत्ते सूरः साकूतं अभ्यधात्, (हे) कुमार! क्षुधातापिषु त्वं कृपाधारः, अपरः न. ॥ ५६ ॥

अर्थः-पछी ज्यां फक्त हजु अर्धु भोजन अपायुं, त्यांज सूर ( पोताना जरा संकुचित ) आशय मुजब बोल्यो के, हे कुमार! क्षुधातुरो प्रते जेवो तुं दयालु छो, ( एवो ) बीजो कोइ नथी. ॥ ५६ ॥

विज्ञाय तदभिप्रायमपि साधौ निषेधति । कुमारः पुरुषाहारमानमन्नमदान्मुदा ॥ ५७ ॥

अन्वयः-तत् अभिप्रायं विज्ञाय साधौ निषेधति अपि कुमारः पुरुषाहारमानं अन्नं मुदा अदात् ॥ ५७ ॥

अर्थः-ते सूरना मननो आशय जाणीने मुनिए निवार्या छतां पण ते विश्वसेन कुमारे एक पुरुष भोजन करी शके तेटलो आहार हर्षथी ( ते मुनिने ) आप्यो. ॥ ५७ ॥

वलमानस्य निःसङ्गपतेरङ्गमथैक्षत । कुमारः पश्चिमं स्फारदद्रुमण्डलमण्डलम् ॥ ५८ ॥

अन्वयः-अथ वलमानस्य निःसंगपतेः पश्चिमं अंगं स्फारदद्रु मंडल मंडलं कुमारः ऐक्षत. ॥ ५८ ॥

अर्थः-पछी (त्यांथी पाछा) वळता एवा ते मुनिराजनुं पाछळनुं शरीर ( पीठनो भाग ) दादरना चक्रोना समूहथी भरेलुं ते कुमारे जोयुं. ॥ ५८ ॥

समं स मित्रैर्भूजानिजानिर्जनितभोजनः । जयमुत्साहयन्साधुचिकित्सात्युत्सुकोऽभवत् ॥ ५९ ॥

अन्वयः-मित्रैः समं जनित भोजनः सः भूजानि जानिः जयं उत्साहयन् साधुचिकित्सा अति उत्सुकः अभवत्. ॥ ५९ ॥

अर्थः-(पछी) मित्रोसाथे भोजन कर्याबाद ते राजकुमार (ते) जयनामना (वैद्यपुत्रने) उत्साहवाळो करतोथको ते मुनिराजनी दादरनुं औषध करवामाटे अत्यंत उत्सुक थयो. ॥ ५९ ॥

विश्वसेनकलासारौ शुश्रूषां चक्रतुर्यतेः । असज्जयज्जयः शूरवीरानीता महौषधीः ॥ ६० ॥

अन्वयः—विश्वसेन कलासारौ यतेः शुश्रूषां चक्रतुः, जयः शूरवीर आनीताः महौषधीः असज्जयत् . ॥ ६० ॥

अर्थः-(पछी) विश्वसेनकुमार तथा कलासार ते मुनिराजनी शुश्रूषा करवा लाग्या, अने शूर तथा वीरे लावी आपेली उमदी औषधीओने जये तैयार करी ॥ ६० ॥

इति क्रमेण निःक्रान्तरुजि संक्रान्तकान्तते । मुनौ संमदविश्रान्ते तमिस्रान्तेऽचलन्नमी ॥ ६१ ॥

अन्वयः-इति क्रमेण मुनौ निःक्रांत रुजि, संक्रांत कांतते, संमद विश्रांते अमी तमिस्रा अंते अचलन् . ॥ ६१ ॥

अर्थः-एवीरीते अनुक्रमे ते मुनिराज रोग निकळी जवाथी तेजस्वी शरीरवाळा तथा आनंदथी शांत थयाबाद ते सर्व मित्रो रात्रिने अंते ( त्यांथी ) चाली निकळ्या. ॥ ६१ ॥

क्रमयामिकतावश्यवयस्यगणमध्यगः । क्षपायां विपिने क्वापि सुष्वाप क्ष्मापनन्दनः ॥ ६२ ॥

अन्वयः—क्रम यामिकता वश्य वयस्य गण मध्यगः क्ष्मापनंदनः क्षपायां विपिने क्व अपि सुष्वाप. ॥ ६२ ॥

अर्थः—अनुक्रमे चोकी करवामां सावधान एवा मित्रोना समूहनी अंदर रहेलो ते राजकुमार रात्रिए वननी अंदर क्यांक निद्रावश थयो. ॥ ६२ ॥

तृतीययामिनीयामयामिके जयनामनि । प्रमादतः प्रसुप्तेऽत्र दैवाद्दावानलोऽज्वलत् ॥ ६३ ॥

अन्वयः—तृतीय यामिनी याम यामिके जयनामनि प्रमादतः सुप्ते दैवात् अत्र दावानलः अज्वलत् ॥ ६३ ॥

अर्थः–रात्रिना त्रीजा पोहोरनो चोकीदार जय नामनो मित्र प्रमादने लीधे निद्रावश थतां, दैवयोगे त्यां दावानल प्रगटी निकळ्यो

कुमारो द्राग्जजागार स्फुटद्वेणुघटास्वनैः । प्रमादसुप्तस्तत्त्वज्ञो लोकशोकरवैरिव ॥ ६४ ॥

अन्वयः—प्रमादसुप्तः तत्त्वज्ञः लोकशोकरवैः इव, स्फुटत् वेणु घटा स्वनैः कुमारः द्राग् जजागार. ॥ ६४ ॥

अर्थः—( एवामां ) प्रमादमां पडेलो तत्त्वज्ञानी मनुष्य लोकोना शोकातुर ( विलापना ) शब्दोवडे जेम ( जागृत थाय ) तेम फाटता वांसोना समूहना शब्दोवडे ते राजकुमार तुरत जागी उठ्यो. ॥६४॥

यावत्पश्यत्ययं तावद्दावानलशिखावलिः । नृत्यतीव वनं प्राज्ययोजनं प्राप्य भोजनम् ॥ ६५ ॥

अन्वयः-यावत् अयं पश्यति, तावत् दावानल शिखा आवलिः प्राज्ययोजनं भोजन वन प्राप्य नृत्यति इव ६५ ॥
अर्थः-जेटलामां ते नजर करे छे, तेटलामां ( तो ) ते दावानलनी ज्वालाओनी श्रेणि घृतयुक्त ( पक्षे-जोजननां विस्तारवाळुं ) भोजन सरखुं ते वन मळवाथी जाणे नाचती होय नही! ( तेम देखावा लागी ) ॥ ६५ ॥

**उत्थाप्य सुहृदो यावत्करोत्येष पलायनम् । तावद्बभार निर्द्वारप्राकाराकारतां दवः ॥ ६६ ॥**

अन्वयः-यावत् सुहृदः उत्थाप्य एषः पलायनं करोति, तावत् दवः निर्द्वार प्राकार आकारतां बभार. ॥ ६६ ॥
अर्थः-(पछी) जेवामां मित्रोने उठाडीने ते नाशवानुं करे छे, एवामां ते दावानले दरवाजा विनाना किल्लाना आकारने धारण कर्यो ( अर्थात् तेओने तेमांथी निकळवानो मार्ग रह्यो नही. ) ॥ ६६ ॥

**स निर्जिगमिषुर्दावात्किं तु निर्गन्तुमक्षमः । संभ्रमी बम्भ्रमीति स्म मिथ्यादृष्टिर्भवादिव ॥ ६७ ॥**

अन्वयः-भवात् मिथ्यादृष्टिः इव, दावात् निर्जगमिषुः, किंतु निर्गंतुं अक्षमः सः इति संभ्रमी बंभ्रमीति स्म. ॥ ६७ ॥
अर्थः—संसारमांथी मिथ्यादृष्टि जेम ( निकळवानी इच्छा करे ) तेम ते दावानलमांथी ( बहार ) निकळवाने इच्छतो, परंतु निकळवाने अशक्त एवो ते विश्वसेनकुमार ए रीते गभराटनो मार्यो भमवा लाग्यो. ॥ ६७ ॥

**अनल्पाः स विपत्कल्पाः क्षिपन्कीला दवानलः । धूमैस्तमान्धयन्मोह इवाभव्यं कदाग्रहैः ॥ ६८ ॥**

अन्वयः—मोहः कदाग्रहैः अभव्यं इव, विपत्कल्पाः अनल्पाः कीलाः क्षिपन् दवानलः धूमैः तं आंधयत्. ॥ ६८ ॥

अर्थः—मोह दुराग्रहोथी जेम अभव्य प्राणीने ( आंधळो करे ) तेम आपदो सरखी अनेक ज्वालाओने फेलावतो ते दावानल धुंवाडाथी ते राजकुमारने आंधळो करवा लाग्यो. ॥ ६८ ॥

कामं संकटयामास कृशानुस्तं क्रमान्मिलन् । परितः सरितः पूर इव द्वीपासिनं जनम् ॥ ६९ ॥

अन्वयः—सरितः पुरः द्वीपासिनं जनं इव, क्रमात् परितः मिलन् कृशानुः तं कामं संकटयामास. ॥ ६९ ॥

अर्थः—नदीमां आवेलुं पूर ( तेनी वच्चे रहेला ) बेटपर बेठेला माणसने जेम (संकडामणमां नाखे) तेम अनुक्रमे चोतरफथी एकठो थइने घेरातो एवो ते दावानल ते राजकुमारने बहुज संकटमां नाखवा लाग्यो. ॥ ६९ ॥

यत्र यत्र जगामायं वयस्यास्तत्र तत्र ते । अन्वगुस्तं शुभात्मानं पुरुषार्थोदया इव ॥ ७० ॥

अन्वयः—अयं यत्र यत्र जगाम, तत्र तत्र ते वयस्याः पुरुषार्थ उदयाः इव तं शुभात्मानं अन्वगुः. ॥ ७० ॥

अर्थः—(पछी) आ राजकुमार ज्यां ज्यां जवा लाग्यो, त्यां त्यां (तेना) ते मित्रो, (धर्मआदिक ) चारे पुरुषार्थोना उदयनी पेठे ते धर्मात्मानी पाछळ पाछळ जवा लाग्या. ॥ ७० ॥

तापव्यापदि संभ्राम्यन्स बभावात्मपञ्चमः । अक्षग्राम इवोद्दामव्यथाया विपिनश्रियः ॥ ७१ ॥

अन्वयः-आत्मपंचमः ताप व्यापदि संभ्राम्यन् उद्दामव्यथायाः विपिनश्रियः अक्षग्रामः इव बभौ. ॥ ७१ ॥

अर्थः—पोतासहित पांचमो एवो ते राजकुमार तापनी व्यथाथी भमतोथको अत्यंत वेदना पामती एवी वनलक्ष्मीना इंद्रियसमूहनी पेठे शोभवा लाग्यो. ॥ ७१ ॥

चेलान्तं चिहुरान्तं च गृह्णन्कीलाग्रपाणिना । मुहुराच्छोटितो वह्निस्त्रसद्भिस्तैश्चपेटया ॥ ७२ ॥

अन्वयः—चेलांतं च चिहुरांतं कीला अग्र पाणिना गृहान् वह्निः त्रसद्भिः तैः मुहुः चपेटया आच्छोटितः ॥ ७२ ॥

अर्थः—वस्त्रोना तथा केशोना छेडाओने ज्वालाओना अग्रभागरूपी हाथथी ग्रहण करता एवा ते अग्निने त्रास पामता एवा तेओ वारंवार थापड मारी खसेडवा लाग्या. ॥ ७२ ॥

अगम्येषु प्रदेशेषु सर्वेष्वेकप्रदेशगान् । नृमांसस्वादलोभीव दावस्ताञ्जिह्वयालिहत् ॥ ७३ ॥

अन्वयः-सर्वेषु प्रदेशेषु अगम्येषु एकप्रदेशगान् तान् दावः नृमांसस्वादलोभी इव जिह्वया अलिहत् ॥ ७३ ॥

अर्थः--सघळा प्रदेशो गमन करवा माटे बंध थवाथी एकज प्रदेशमां एकठा थयेला एवा तेओने, ते दावानळ, मनुष्यनुं मांस चाखवाने जाणे लालचु थयो होय नही ! तेम ( पोतानी ) ज्वालारूपी जीभथी चाटवा लाग्यो. ॥ ७३ ॥

तेषां कीलाग्रचकितैः संकुचद्भिः समन्ततः । अङ्गैरङ्गेष्विव तदा प्रवेष्टुमुपचक्रमे ॥ ७४ ॥

अन्वयः—तदा समंततः कीलाग्रचकितैः, संकुचद्भिः तेषां अगैः अंगेषु प्रवेष्टुं इव उपचक्रमे. ॥ ७४ ॥

अर्थः-ते वखते चोतरफथी (नजीक आवती) ज्वालाओथी डर पामेलां, अने तेथी संकोचातां एवां तेओनां अंगो, जाणे अंगोमां पेसी जतां होय नही! तेम जणावा लाग्यां. ॥ ७४ ॥

रुद्धायां जीविताशायामाशाभिः सह वह्निना । क्षणेऽत्र सुहृदः स्माह महीदयितनन्दनः ॥ ७५ ॥

अन्वयः-वह्निना आशाभिः सह जीविताशायां रुद्धायां, अत्र क्षणे महीदयितनंदनः सुहृदः स्माह. ॥ ७५ ॥

अर्थः-एवीरीते अग्निवडे (बीजी) आशोओनी (दिशाओनी) साथे जीववानी आशा (पण) नष्ट थये छते, ते वखते ते विश्वसेन राजकुमार (पोताना) मित्रोने कहेवा लाग्यो के, ॥ ७५ ॥

आकृष्ये मरुतेवाहमाकाशं प्रति संप्रति । आलिङ्गत मदङ्गं तन्मा मृत्यौ विरहोऽस्तु नः ॥ ७६ ॥

अन्वयः—संप्रति अहं मरुता इव आकाशं प्रति आकृष्ये, तत् मदंगं आलिंगत? मृत्यौ नः विरहः मा अस्तु. ॥ ७६ ॥

अर्थः—हमणा हुं जाणे पवनवडे आकाशमां खेंचाउं छुं, माटे तमो मारां शरीरने वळगी रहो? मृत्युसमये पण आपणा वच्चे विरह पडवो न जोइये ॥ ७६ ॥

अथ लग्नौ दृढं वीरजयौ पदसरोजयोः । कुमारस्य कलासारशूरौ तु करपद्मयोः ॥ ७७ ॥

अन्वयः-अथ वीर जयौ कुमारस्य पदसरोजयोः दृढं लग्नौ, कलासार शूरौ तु करपद्मयोः ॥ ७७ ॥

अर्थः-पछी वीरे अने जये ते विश्वसेनकुमारना चरणकमलोने जोरथी पकड्या, तथा कलासारे अने शूरे तेना हस्तकमलोने पकड्या

**अमी समीरसंवर्तहृता इव चमत्कृताः । आत्तमुक्ता इव दवज्वालाभिः खमथागमन् ॥ ७८ ॥**

अन्वयः—अथ समीर संवर्त हृताः इव दवज्वालाभिः आत्तमुक्ताः इव चमत्कृताः अमी खं अगमन् ॥ ७८ ॥

अर्थः—पछी जाणे वायुना वंटोळीआए अधर उपाड्या होय नही तथा दावानळनी ज्वाळाओए जाणे झपाटमां लेइ छोडी दीधा होय नही! तेम तेओ आकाशमां गमन करवा लाग्या. ॥ ७८ ॥

**तापातुरस्फुरज्जन्तुपटलं ज्वलनं ततः । तेऽपश्यन्पुरुषोत्तंसाः संसारमिव योगिनः ॥ ७९ ॥**

अन्वयः-ततः ते पुरुषोत्तंसाः योगिनः संसारं इव तापातुर स्फुरत् जंतु पटलं ज्वलनं अपश्यन् ॥ ७९ ॥

अर्थः—पछी ते उत्तम पुरुषो, योगीओ जेम संसारने, तेम तापथी पीडाइने तरफडता छे प्राणीओना समूहो जेमां, एवा ते अग्निने जोवा लाग्या ॥ ७९. ॥

**अथो दवद्वीयस्यां ते वयस्याः क्षितौ स्थितम् । स्वप्नोत्थितमिवात्मानं कलयन्ति स्म विस्मिताः ॥ ८० ॥**

अन्वयः—अथो ते वयस्याः विस्मिताः स्वप्नोत्थितं इव आत्मानं दवद्वीयस्यां क्षितौ स्थितं कलयंतिस्म. ॥ ८० ॥

अर्थः—पछी ते मित्रो आश्चर्य पामताथका जाणे स्वप्नमांथी जागृत थया होय नही ! तेम पोताने (ते) दावानलथी दूर रहेली जमीन पर रहेला जोवा लाग्या. ॥ ८० ॥

**यावत्किमिदमित्यन्तश्चिन्तां विरचयन्ति ते। तावदाविरभूत्कोऽपि पुरः श्रीभासुरः सुरः ॥ ८१ ॥**

अन्वयः—इदं किं ? इति यावत् ते अंतः चिंतां विरचयंति, तावत् श्रीभासुरः कः अपि सुरः पुरः आविरभूत्. ॥ ८१ ॥

अर्थः–आ ते शुं थयुं ? एम जेटलामां तेओ (पोतना) हृदयमां विचारे छे, तेवामां शोभाथी देदीप्यमान एवो कोइक देव (तेओनी) आगळ प्रगट थयो. ॥ ८१ ॥

**कमलाभमुखोन्मीलत्कलहंसकलस्वरः। स जगौ जगतीजानितनयं विनयान्वितः ॥ ८२ ॥**

अन्वयः—कमल आभ मुख उन्मीलत् कलहंस कलस्वरः सः विनयान्वितः जगती जानि तनयं जगौ. ॥ ८२ ॥

अर्थः—कमलसरखां मुखमांथी निकळतो छे राजहंससरखो स्वर जेनो, एवो ते देव विनयसहित राजपुत्रने कहेवा लाग्यो के,–

**शिक्षयित्वा त्वयामोचि चौरः कारुण्यगौर यः। सोऽहं सद्धर्मनिर्माणादीदृशीं श्रियमश्रयम् ॥ ८३ ॥**

अन्वयः—(हे) कारुण्यगौर ! यः चौरः शिक्षयित्वा त्वया अमोचि, सः अहं सद्धर्म निर्माणात् ईदृशीं श्रियं अश्रयं ॥ ८३ ॥

अर्थः—हे दयाथी उज्जवल एवा राजकुमार ! जे चोरने शिखामण आपीने तें छोडाव्यो हतो, ते हुं उत्तम धर्मकार्यो करवाथी आवी समृद्धि पाम्यो छुं. ॥ ८३ ॥

विपन्निपतितं मत्वा तत्त्वामवधिनाधुना । प्राप्तोऽस्मि प्राणदानेन क्रीतानां समयो ह्ययम् ॥ ८४ ॥

अन्वयः—तत् अवधिना अधुना त्वां विपत् निपतितं मत्वा प्राप्तः अस्मि, हि प्राणदानेन क्रीतानां अयं समयः. ॥ ८४ ॥

अर्थः—माटे अवधिज्ञानथी हमणा तने आपदामां पडेलो जाणीने हुं ( अहीं ) आव्यो छुं, केमके प्राणसाटे वेचाण थयेलाओनो आ अवसर छे. ॥ ८४ ॥

एवमुक्त्वा समित्रस्य वपुर्नृपतिजन्मनः । स चकार करस्पर्शादतापं दलितश्रमम् ॥ ८५ ॥

अन्वयः—एवं उक्त्वा सः समित्रस्य नृपति जन्मनः वपुः करस्पर्शात् अतापं दलितश्रमं चकार. ॥ ८५ ॥

अर्थः—एम कहीने ते देवे मित्रसहित ते राजकुमारनुं शरीर (पोताना) हाथना स्पर्शथी तापरहित तथा थाकविनानुं कर्युं. ॥८५॥

नाद्य प्रभृति दुःखस्य लवोऽपि भविता तव । इत्युदित्वा स विद्योतैर्द्योतयन्द्यां तिरोदधे ॥ ८६ ॥

अन्वयः—अद्य प्रभृति तव दुःखस्य लवः अपि न भविता, इति उदित्वा विद्योतैः द्यां द्योतयन् सः तिरोदधे. ॥ ८६ ॥

अर्थः—आजथी मांडीने तने दुःखनो लेशमात्र पण नही थाय, एम कही तेजवडे आकाशने दीपावतोथको ते देव त्यांथी अदृश्य थयो. ॥ ८६ ॥

तेऽपि तोयरुहभ्रान्तभृङ्गीगीतेऽरुणोदये । कान्तारान्ताय संचेलुस्तच्चरित्रार्द्रचेतसः ॥ ८७ ॥

अन्वयः-तोयरुह भ्रांत भृंगी गीते अरुणोदये तत् चरित्र आर्द्रचेतसः तेऽपि कांतार अंताय संचेलुः. ॥ ८७ ॥

अर्थः—(पछी) कमळोनी आसपास भमता भमराओए जणावेला अरुणोदय वखते, ते देवनां वृत्तांतथी दयाळु थयेल हृदयवाळा ते त्रणे मित्रो पण वननो पार पामवामाटे (त्यांथी) चालवा लाग्या. ॥ ८७ ॥

**तारे तरणितारुण्ये कारुण्येन व्यलोकि तैः । आपतद्विपिनक्रोडे क्रोडानामाकुलं कुलम् ॥ ८८ ॥**

अन्वयः-तारे तरणि तारुण्ये कारुण्येन तैः विपिनक्रोडे आपतत् क्रोडानां आकुलं कुलं व्यलोकि. ॥ ८८ ॥

अर्थः—सारीपेठे सूर्योदय थइ गयाबाद दयाळुपणे तेओए वननी अंदर दोडी आवतुं एवुं डुक्करोनुं गभरायेलुं टोळुं जोयुं. ।८८।

**युद्धाय धावता यूथं पश्यता नश्यता मुहुः । खेदितं मेदुरेणाथ प्रोथिनाथेन केनचित् ॥ ८९ ॥**
**कंचिदञ्चितकोदण्डमुद्दण्डहयमण्डनम् । उत्किरीटं नरं प्रेक्ष्य कुमारस्तारगीर्जगौ ॥ ९० ॥ युग्मं ॥**

अन्वयः-अथ युद्धाय धावता, यूथं मुहुः पश्यता, नश्यता, केनचित् मेदुरेण प्रोथिनाथेन खेदितं, ॥ ८९ ॥ अंचितकोदंडं, उद्दंडहयमंडनं, उत्किरीटं कंचित् नरं प्रेक्ष्य तारगीः कुमारः जगौ. ॥ ९० ॥ युग्मं ॥

अर्थः-पछी लडवामाटे दोडता, (पोताना) टोळांतरफ वारंवार जोता, अने नाशता एवा कोइक पुष्ट डुक्करपतिना (हल्लाथी) थाकी गयेला, ॥ ८९ ॥ खेंचेला धनुष्वाळा, प्रचंड घोडापर स्वार थयेला, अने मस्तकपर मुकुटवाळा कोइक पुरुषने जोइ ते विश्वसेन कुमार म्होटा स्वरथी बोल्यो के, ॥ ९० ॥ युग्मं ॥

त्वमीशोऽसि महाभाग महीभागस्य कस्यचित् । अङ्ग त्वदङ्गलक्ष्याणि लक्षणानि वदन्त्यदः ॥ ९१ ॥

अन्वयः—(हे) महाभाग ! त्वं कस्यचित् महीभागस्य ईशः असि, अंग त्वदंग लक्ष्याणि लक्षणानि अदः वदंति. ॥ ९१ ॥

अर्थः-(हे) महाभाग्यशाली ! तुं कोइक देशनो राजा जणाय छे. केमके तारां शरीरपर देखातां चिह्नो ते हकीकत जाहेर करे छे.

राज्ञां द्विषोऽप्यवध्यास्ते ये दधुस्तृणमानने । नृहंस हन्सि तज्जन्तून्निर्मन्तून्किं तृणाननान् ॥ ९२ ॥

अन्वयः-ये आनने तृणं दधुः, ते द्विषः अपि राज्ञां अवध्याः, तत् (हे) नृहंस ! तृणाननान् निर्मंतून् जंतून् किं हंसि ? ॥ ९२ ॥

अर्थः-जेओ मुखमां तृण धारण करे छे, एवा शत्रुओने पण राजा मारता नथी, माटे हे उत्तम पुरुष ! मुखमां तृण धारण करनारा (आ) निरपराधी प्राणीओने तमो केम मारो छो ? ॥ ९२ ॥

अकृताङ्गपरिष्कारा: सदाचारा वनौकसः । मुनीन्द्रा इव विद्राव्याः पशवो न विवेकिना ॥ ९३ ॥

अन्वयः—अकृत अंगपरिष्काराः, सदाचाराः, वनौकसः मुनींद्राः इव पशवः विवेकिना न विद्राव्याः. ॥ ९३ ॥

अर्थः-शरीरसंबंधि संस्कार नही करनारा, उत्तम आचारवाळा, (अथवा हमेशां विहार करनारा) अने वनमां निवास करनारा, एवा महामुनिओसरखा पशुओने विवेकीमाणसोए हेरान करवा न जोइये. ॥ ९३ ॥

हन्ति जन्तुः पुरा हन्तॄनेभिरग्रे च हन्यते । तद्वध्यरक्षया दक्षः स्वैरं स्याद्वैरपारगः ॥ ९४ ॥

अन्वयः-जंतुः पुरा हंन् हंत्दति, च अग्रे एभिः हन्यते, तत् बध्यरक्षया दक्षः स्वैरं वैरपारगः स्यात्. ॥ ९४ ॥

अर्थः—प्राणी (पोताने) पूर्वे मारनाराओने मारे छे, तथा पाछो आगळ तेओवडे ते हणाय छे, माटे मारवा लायक प्राणीने न मारवाथी डाह्यो माणस पोतानी मेळेज वैरथी विमुक्त थाय छे. ॥ ९४ ॥

कां योनिं न जगामायमात्मा प्रतिकुलं किल । तत्सर्वस्यापि सर्वोऽपि बन्धुर्वध्योऽस्तु कस्य कः ॥९५॥

अन्वयः-अयं आत्मा किल प्रतिकुलं कां योनिं न जगाम ? तत् सर्वस्य अपि सर्वः अपि बंधुः, कस्य कः वध्यः अस्तु ? ।९५।

अर्थः—आ जीव खरेखर दरेक जातिमां कइ योनिमां नथी गयो ? ( अर्थात् सर्वयोनिओमां प्रायें उत्पन्न थयो छे. ) माटे सर्व प्राणीओ सर्व प्राणीओना बंधु छे. कोने कोण मारवा योग्य छे ? ॥ ९५ ॥

इति क्षत्रत्वधर्मित्वनीतिसौजन्यजन्यया । कृपया नृपकोटीर रक्ष्यतां रक्ष्यतां पशुः ॥ ९६ ॥

अन्वयः—इति क्षत्रत्व धर्मित्व नीति सौजन्य जन्यया कृपया (हे) नृपकोटीर ! पशुः रक्ष्यतां ? रक्ष्यतां ? ॥ ९६ ॥

अर्थः-माटे क्षत्रीयपणुं, धर्मिपणुं, नीति तथा सज्जनपणाने उत्पन्न करनारी दयावडे करीने, हे राजेंद्र ! तमो पशुओनुं रक्षण करो? रक्षण करो ? ॥ ९६ ॥

इत्युक्तिश्रुतिहृष्टोऽयमुत्तीर्य त्वरया हयात् । लुठन्कुमारपादारविन्दयोरिदमब्रवीत् ॥ ९७ ॥

अन्वयः—इति उक्ति श्रुति हृष्टः अयं त्वरया हयात् उत्तीर्य कुमार पाद अरविंदयोः लुठन् इदं अब्रवीत्. ॥ ९७ ॥

अर्थः—एवीरीतना वचनो सांभळवाथी खुशी थयेलो ते माणस तुरत घोडापरथी उतरीने ते विश्वसेनकुमारना चरणोमां नमीने आ प्रमाणे बोलवा लाग्यो. ॥ ९७ ॥

**त्वत्प्रेष्यस्यापि मे जन्तुजातघातकृतागसः । त्वयि नित्यक्षमाभाजि क्षमस्वेति न भाति वाक् ॥ ९८॥**

अन्वयः-नित्यक्षमाभाजि त्वयि जंतु जात घात कृत आगसः त्वत्प्रेष्यस्य अपि मे, क्षमस्व इति वाक् न भाति. ॥ ९८ ॥

अर्थः-हमेशां क्षमाने धारण करनारा एवा आपमते, सर्व जीवोना घातथी करेल छे अपराधो जेणे एवो, तथा आपना नोकरसरखो एवो जे हुं, तेनी " क्षमा करो ! " एवी वाणी पण शोभाने पात्र नथी. ॥ ९८ ॥

**अथवाहं तवालोकविगलद्वृजिनव्रजः । न किंचित्क्षमये साक्षान्नीरुजां किमु जायुभिः ॥ ९९ ॥**

अन्वयः-अथवा तवालोक विगलत् वृजिनव्रजः अहं किंचित् न क्षमये, साक्षात् नीरुजां जायुभिः किमु ? ॥ ९९ ॥

अर्थः-अथवा आपना फक्त दर्शनमात्रथीज नष्ट थयेल छे पापोनो समूह जेनो, एवो हुं (हवे) कंइं पण क्षमा मागतो नथी, केमके साक्षात् निरोगी थयेलाओने औषधनी शी जरुर छे ? ॥ ९९ ॥

**कुमार नृपतिद्वारि बद्धस्य लुठतः क्षितौ । तदा प्राणप्रदानेन त्वया मे जनकायितम् ॥ १०० ॥**

अन्वयः-(हे) कुमार ! तदा नृपतिद्वारि बद्धस्य क्षितौ लुठतः मे प्राणदानेन त्वया जनकायितं. ॥ १०० ॥

अर्थः--हे राजकुमार ! ते वखते राजमहेलना दरवाजा पासे बांधेला तथा ( ए हालतमां ) जमीनपर लोटता एवा मने आप

जीवितदान आपी मारा पितातुल्य थया छो. ॥ १०० ॥

ताम्रलिप्त्यां पुरि स्वाम्यं ततः स्वामिन्नुरीकुरु । इहैश्वर्यं न मे युक्तं पितरीव त्वयि स्थिते ॥१०१॥

अन्वयः-ततः स्वामिन् ! ताम्रलिप्त्यां पुरि स्वाम्यं अंगीकुरु ? इह पितरि इव त्वयि स्थिते मे ऐश्वर्यं युक्तं न. ॥ १०१ ॥

अर्थः-तेथी (हे) स्वामी ! (आ) ताम्रलिप्तीनगरीनुं राज्य (आप) स्वीकारो ? केमके अहीं (मारा) पिता समान एवा आपनी हाजरी होते छते मारे राज्य करवुं उचित नही. ॥ १०१ ॥

अथामुं ताम्रलिप्तीशं जानन्भूजानिनन्दनः । उत्थाप्य प्रीतिवर्यश्रीः पर्यरब्ध प्रमोदिनम् ॥ १०२॥

अन्वयः-अथ भूजानिनंदनः अमुं ताम्रलिप्ती ईशं जानन् , प्रीतिवर्यश्रीः उत्थाप्य प्रमोदिनं पर्यरब्ध. ॥ १०२ ॥

अर्थः-पछी ते विश्वसेनराजकुमारे तेने ताम्रलिप्तिनगरीनो राजा जाणतां अत्यन्त प्रेमपूर्वक उठाडीने, खुशी थयेला एवा ते राजाने आलिंगन कर्युं. ॥ ३४२ ॥

निजदेशपरीवारपरीहारनिबन्धनम् । अथाख्यात्पृच्छते सोऽस्मै कुमारः कारणान्तरम् ॥ १०३ ॥

अन्वयः—अथ निज देश परीवार परीहार निबंधनं पृच्छते अस्मै सः कुमारः कारणांतरं आख्यत् . ॥ १०३ ॥

अर्थः—पछी पोतानो देश तथा परीवारने तजवानुं कारण पूछता एवा ते राजाने ते कुमारे कंइ बीजुंज कारण जणाव्युं. ॥१०३॥

अथ स्फारास्यफेनासु हयसेनासु हेषया । हसन्तीष्विव चेतांसि समेतासु त्वराभरात् ॥ १०४ ॥
अमूढतुरगारूढं प्रौढभक्तिर्धराधिपः । कुमारं ससुहृद्दारं नगराय निनाय तम् ॥ १०५ ॥ युग्मम् ॥

अन्वयः–अथ त्वराभरात् स्फार आस्य फेनासु, हेषया चेतांसि हसंतीषु इव हय सेनासु समेतासु ॥१०४॥ प्रौढभक्तिः धराधिपः ससुहृद्दारं अमूढ तुरग आरूढं तं कुमारं नगराय निनाय ॥ १०५ ॥ युग्मं ॥

अर्थः-पछी अति उतावळी चालथी मुखमां आवेलां घणां फीणवाळी, तथा हेषारवथी मननी पण जाणे हांसी करती, एवी घोडेस्वारोवाळी सेना आवी पहोंच्याबाद ॥ १०४ ॥ अति भक्तिवाळो ते राजा मित्रोना समूह सहित उत्तम घोडापर बेसाडेला ते राजकुमारने (पोताना) नगरमां लेइ गयो. ॥ १०५ ॥ युग्मं ॥

हस्तपादाग्रलग्नेन भूपेन व्यक्तभक्तिना । लक्षणानां गणेनेव स राज्येऽध्यासितो बलात् ॥ १०६ ॥

अन्वयः—लक्षणानां गणेन इव हस्त पाद अग्र लग्नेन, व्यक्त भक्तिना भूपेन सः बलात् राज्ये अध्यासितः ॥ १०६ ॥

अर्थः—लक्षणोना समूहनी पेठे हाथ तथा पगोना अग्रभागने लागेला ( अर्थात् हाथ जोडी पगे लागेला ) अने प्रगट भक्तिवाळा एवा ते राजाए ते विश्वसेन कुमारने बलात्कारे राज्यगादीपर बेसाड्यो. ॥१०६॥

वेत्रीभूय पुरः प्रीत्या नरदेवः स्वसेवकान् । पदद्वयं कुमारस्य नमस्कारयति स्म सः ॥ १०७ ॥

अन्वयः-सः नरदेवः प्रीत्या कुमारस्य पुरः वेत्रीभूय स्वसेवकान् पदद्वयं नमस्कारयतिस्म. ॥ १०७ ॥
अर्थः-( पछी ) ते राजा प्रेमथी ते कुमारनी आगळ ( पोते ) छडीदार थइने पोताना नोकरोने ( तेना ) बन्ने चरणोमां नमस्कार कराववा लाग्यो. ॥ १०७ ॥

**एवं सेव्यपदो विश्वसेनस्तेन महीभुजा। धामभिस्तामसौ ताम्रलिप्तीं चिरमभूषयत् ॥ १०८ ॥**

अन्वयः-एवं तेन महीभुजा सेव्यपदः असौ विश्वसेनः धामभिः चिरं ताम्रलिप्तीम् अभूषयत् ॥ १०८ ॥
अर्थः—एवीरीते ते राजावडे सेवायेल छे, चरणो जेना, एवो ते विश्वसेनकुमार ( पोताना ) तेजवडे घणा काळसुधी (ते) ताम्रलिप्तिनगरीने शोभाववा लाग्यो. ॥ १०८ ॥

**इत्यशेषं निशम्यास्य चरेभ्यश्चरितं नृपः। सुमित्रः पिप्रिये पुत्रपुण्यपात्रत्वनिश्चयात् ॥ १०९ ॥**

अन्वयः—इति अस्य अशेषं चरितं चरेभ्यः निशम्य सुमित्रः नृपः पुत्र पुण्य पात्रत्व निश्चयात् पिप्रिये. ॥ १०९ ॥
अर्थः—एवी रीते आ विश्वसेनकुमारनुं सघळुं वृत्तांत गुप्तचरोमारफते सांभळीने (ते) सुमित्रराजा ( पोताना ) पुत्रना पुण्यपात्रपणाना निश्चयथी खुशी थवा लाग्यो. ॥ १०९ ॥

**यास्यता जनकेनाथ योगभोगधिया वनम्। अयमाकार्य नाकेन्द्रप्रतापः क्ष्मापतिः कृतः ॥ ११० ॥**

अन्वयः-अथ योग भोग धिया वनं यास्यता जनकेन नार्केंद्र प्रतापः अयं आकार्य क्ष्मापतिः कृतः. ॥ ११० ॥

अर्थः-पछी योग साधवानी बुद्धिथी वनमां जवाने (इच्छता) एवा (तेना) पिताये इंद्रसरखा प्रतापवाळा एवा ते विश्वसेन कुमारने बोलावीने राजा कर्यो. ॥ ११० ॥

सुहृद्भिः सह हृद्भित्तिचित्रितान्योन्यमूर्त्तिभिः । स चकार चिरं राज्यं सुकृतैककृतोद्यमः ॥ १११ ॥

अन्वयः—सुकृत एक कृत उद्यमः सः हृद्भित्ति चित्रित अन्योन्य मूर्तिभिः सुहृद्भिः सह चिरं राज्यं चकार. ॥ १११ ॥

अर्थः—पुण्यमांज फक्त करेल छे उद्यम जेणे एवो ते विश्वसेनकुमार हृदयरूपी भींतमां चित्रेल छे (पोतानी) परस्पर छबीओ जेणे एवा ते मित्रोसहित घणा काळसुधी राज्य करवा लाग्यो. ॥ १११ ॥

महीभोगमहीनं ते भुक्त्वाऽऽनते सुरौकसि । जग्मुः पञ्चापि तत्रापि मैत्र्यपात्रमिमेऽभवन् ॥ ११२ ॥

अन्वयः—ते पंच अपि अहीनं महीभोगं भुक्त्वा आनते सुरओकसि जग्मुः, तत्र अपि इमे मैत्र्यपात्रं अभवन्. ॥ ११२ ॥

अर्थः—(पछी) ते पांचे संपूर्णपणे पृथ्वीपरना भोगो भोगवीने आनतनामना देवलोकमां गया, (तथा) त्यां पण तेओ मित्र थया.

क्रमात्समस्तमप्येते पीत्वा स्वर्गसुखामृतम् । तदर्जनधियेवोर्वीतलं पुनरवातरन् ॥ ११३ ॥

अन्वयः-क्रमात् एते समस्तं अपि स्वर्ग सुख अमृतं पीत्वा तत् आर्जन धिया इव पुनः ऊर्वीतलं अवारतन्. ॥ ११३ ॥

अर्थः-अनुक्रमे तेओ सघळुं स्वर्गसुखरूपी अमृत पीने, (पाछुं) जाणे ते मेळववानी बुद्धिथी होय नही ! तेम पाछा तेओ पृथ्वी-

तलपर अवतर्या ॥ ३५३ ॥ ( तथा अनुक्रमे ते विश्वसेनकुमार मोक्षपद पाम्या. )

इति श्रीमुनिभक्तिफलोपदर्शने श्रीविश्वसेनचरित्रं समाप्तं. आ चरित्र श्रीवर्धमानसूरिविरचित श्री वासुपूज्यचरित्रनामना महाकाव्यमांथी स्वपरना श्रेय माटे ओधरीने तेना अन्वय तथा गुजराती भाषांतर सहित जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्युं छे. ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजय सुप्रसादात् ॥ श्रीरस्तु ॥



॥ इति श्री विश्वसेन चरित्रं समाप्तम् ॥